# 15 - पञ्चदश दशकम्

## कपिलोपदेशम्

मतिरिह गुण सक्ता बन्धकृत् तेष्व सक्ता तु
अमृत कृदुपरुन्धे भक्ति योगस्तु सक्तिम् ।
महदनुग मलभ्या भक्तिरेवात्र साध्या
कपिल तनुरिति त्वं देवहूत्यै न्यगादीः ॥ ॥15-1॥

प्रकृति मह दहङ्काराश्च मात्राश्च भूतानि
अपि हृदपि दशाक्षी पूरुषः पञ्चविंशः ।
इति विदित विभागो मुच्यतेऽसौ प्रकृत्या
कपिल तनुरिति त्वं देवहूत्यै न्यगादीः ॥ ॥15-2॥

प्रकृति गत गुणौघैर् नाज्यते पूरुषोऽयं
यदि तु सजति तस्यां तत् गुणास्तं भजेरन् ।
मदनु भजन तत्वा लोचनैस् साऽप्य पेयात्
कपिल तनुरिति त्वं देवहूत्यै न्यगादीः ॥ ॥15-3॥

विमल मति रुपात्तैर् आसनाद्यैर् मदङ्गं
गरुड समधिरूढं दिव्य भूषायु धाङ्कम् ।
रुचि तुलित तमालं शीलये तानुवेलं
कपिल तनुरिति त्वं देवहूत्यै न्यगादीः ॥ ॥15-4॥

मम गुणगण लीला कर्णनैः कीर्तनाद्यैः
मयि सुर सरिदोघ प्रख्य चित्तानुवृत्तिः ।
भवति परम भक्तिः सा हि मृत्योर् विजेत्री
कपिल तनुरिति त्वं देवहूत्यै न्यगादीः ॥ ॥15-5॥

अहह बहुल हिंसा सञ्चितार्थैः कुटुम्बं
प्रतिदिन मनुपुष्णन् स्त्री जितो बाल लाली ।
विशति हि गृह सक्तो यातनां मय्यभक्तः
कपिल तनुरिति त्वं देवहूत्यै न्यगादीः ॥ ॥15-6॥

युवति जठर खिन्नो जात बोधोऽप्यकाण्डे
प्रसव गलित बोधः पीडयोल्लङ्घ्य बाल्यम् ।
पुनरपि बत मुह्य त्येव तारुण्य काले
कपिल तनुरिति त्वं देवहूत्यै न्यगादीः ॥ ॥15-7॥

पितृ सुरगण याजी धार्मिको यो गृहस्थः
स च निपतति काले दक्षिणा ध्वोप गामी ।
मयि निहित मकामं कर्म तूदक् पथार्थं
कपिल तनुरिति त्वं देवहूत्यै न्यगादीः ॥ ॥15-8॥

इति सुविदित वेद्यां देव हे देवहूतिं
कृत नुति मनुगृह्य त्वं गतो योगि सङ्घैः ।
विमलमति रथाऽसौ भक्ति योगेन मुक्ता
त्वमपि जन हितार्थं वर्तसे प्रागुदीच्याम् ॥ ॥15-9॥

परम किमु बहूक्त्या त्वत् पदाम्भोज भक्तिं
सकल भय विनेत्रीं सर्व कामोप नेत्रीम् ।
वदसि खलु दृढं त्वं तद्विधू यामयान् मे
गुरु पवन पुरेश त्वय्युपाधत् स्व भक्तिम् ॥ ॥15-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥